# Vidyapatikritam Vishnu Stotram

# विद्यापतिकृतं विष्णुस्तोत्रम्

## Document Information

Text title : Vidyapatikritam Vishnu Stotram

File name : vidyApatikRRitaMviShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | vaiShNavakhaNDa | puruShottamakhaNDa | adhyAya 8/22-33||

Latest update : May 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 5, 2025

*sanskritdocuments.org*

# विद्यापतिकृतं विष्णुस्तोत्रम्

विद्यापतिरुवाच ।
प्रधानपुरुषातीत सर्वव्यापिन्परात्पर ।
चराचरपरीणामपरमार्थ नमोऽस्तु ते ॥ २२॥

श्रुतिस्मृतिपुराणेतिहाससम्प्रतिपादितैः ।
कर्मभिस्त्वं समाराध्य एक एव जगत्पते ॥ २३॥

त्वत्त एतज्जगत्सर्वं सृष्टौ सम्पद्यते विभो ।
त्वदाधारमिदं देव त्वयैव परिपाल्यते ॥ २४॥

कल्पान्ते संहृतं सर्वं त्वत्कुक्षौ सावकाशकम् ।
सुखं वसति सर्वात्मन्नन्तर्यामिन्नमोऽस्तु ते ॥ २५॥

नमस्ते देवदेवाय त्रयीरूपाय ते नमः ।
चन्द्रसूर्यादिरुपेण जगद्भासयसे सदा ॥ २६॥

सर्वतीर्थमयी गङ्गा यस्य पादाब्जसङ्गमात् ।
पुनाति सकलाँल्लोकांस्तस्मै पावयते नमः ॥ २७॥

हवींषि मन्त्रपूतानि सम्यग्दत्तानि वह्निषु ।
परिणामकृते तुभ्यम् ।
जगज्जीवयते नमः ॥ २८॥

यदंशमुपजीवन्ति जगन्त्यानन्दरूपिणः ।
सर्वकल्मषहीनाय तस्मै ब्रह्मात्मने नमः ॥ २९॥

निर्मलाय स्वरूपाय शुभरूपाय मायिने ।
सर्वसङ्गविहीनाय नमस्ते विश्वसाक्षिणे ॥ २.८.३०॥

बहुपादाक्षिशीर्षास्यबाहवे सर्वजिष्णवे ।
सर्वजीवस्वरूपाय नमस्ते सर्वरूपिणे ॥ ३१॥

नमस्ते कमलाकान्त नमस्ते कमलासन ।
नमः कमलपत्राक्ष त्राहि मां पुरुषोत्तम ॥ ३२॥

असारसंसारपरिभ्रमेण निपीड्यमानं खलु रोगशोकैः ।
मामुद्धरास्माद्भवदुःखजातात्पादाब्जयोस्ते शरणं प्रपन्नम् ॥ ३३॥

इति श्रीस्कन्दपुराणे वैष्णवखण्डे पुरुषोत्तमजगन्नाथमाहात्म्ये अष्टमाध्यायान्तर्गतं विद्यापतिकृतं विष्णुस्तोत्रं समाप्तम् ।

स्कन्दपुराण । वैष्णवखण्ड । पुरुषोत्तमखण्ड । अध्याय ८/२२-३३॥

skandapurANa . vaiShNavakhaNDa . puruShottamakhaNDa . adhyAya 8/22-33..

Proofread by PSA Easwaran

*Vidyapatikritam Vishnu Stotram*
pdf was typeset on May 5, 2025

Please send corrections to *sanskrit@cheerful.com*